श्रीमते रामानुजाय नमः

**श्रीमन् निगमान्त महादेशिकैः अनुग्रिहीतं**

## ॥ कुमार लोकाचार्य पञ्चाशत्॥

श्रीमान् वेङ्कटनाथार्य कवितार्किक केसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्ताम् सदा हृदि॥

कावेरि पुलिनान्तराळ लहरी कल्लोल मालालसत्
पर्यङ्कीकृत पन्नगेश्वरतनौ निद्रानिबद्धादरं।
कस्तूरी तिलकाञ्चितं कमलजेनाराधितं श्रीसखं
वस्तु स्वीकृत कौस्तुभं दिशतु न स्वस्ति प्रशस्तं स्वतः॥ 1

नतलोकपालनधिया मरुद्वृधा
पुळिनं जगाम नळिनं विहाय या।
मयि सा तरङ्गयतु रङ्गिणः प्रिया
करुणा तरङ्ग विततीरपाङ्गजाः॥ 2

यत्पाणिपद्मधृत काञ्चन वेत्रवल्ली
स्पन्दस् सुरेन्द्रभय भञ्जन लम्पटात्मा।
वैकुण्ठसूरिपरिषत्प्रभुरत्र शर्म
सोऽयं विकासयतु सूत्रवतीपतिर्मे॥ 3

मुहुर्नत्वा मूर्ध्ना विनतविविधापत् प्रशमने
शठारेः पादाब्जे मधुरकविदेवस्य शरणे।
इदं याचे वाचाऽप्यलकवकुळाळी परिगळत्
मधूळीमाधुर्यं मम वचनभङ्ग्याम् स दिशतु॥ 4

विकासयित्वा निगमान्दभाष्य

सिद्धाञ्जनात् काममपि दीर्घ दृश्टिं।
प्रादर्शयद्यः परमं पुमाम्सं
स पातु मां सम्यमिसार्व भौमः॥ 5

कूरेश गोविन्द पदारविन्द
सेवारसामोदित चिथ्थ भूमा।
भट्टार्यवर्योऽपि सुखम् ददातु
ममाद्य वेदान्तिमुनीश्वरेण॥ 6

यज्जिह्वाग्र विशालरङ्गरसिका वणी प्रवीणाऽनिशं
न्रुत्यन्ती द्रविडार्यसम्स्क्रुतवपुर्दत्ते कवीनां प्रियं।
लोकार्यः कलिवैरि दासगुरुरित्यन्याभिधानस्स मे
कुर्यादुत्तरवीथि कृष्ण महिताचार्यः कलासम्पदं॥ 7

अतुलः कलिवैरि दासवाणी
मणिवल्ली वलनावलम्ब शाखी।
गुरुरुथ्थरवीथिकानिवासी
मम भद्राणि तनोतु कृष्णनामा॥ 8

वत्सान्ववाय वरणीय पयः पयोधेः
जातोदयौ जगति कौस्तुभ चन्द्रबिम्बौ।
मन्ये जगत्वितत कान्ति कलाविलासौ
लोकार्य सुन्दरवरौ किल कृष्ण हृद्यौ॥ 9

वाणीपुण्यसुधापगां शटजितः स्वैरं विगाह्यादरात्
आनीयामृतमत्र चक्रतुरुभौ पानीयशालात्मकं।
यौ वाग्भूषण देसिकेन्द्रहृदयाभिख्य प्रबन्धद्वयं

तौ वन्दे भुवनार्य सुन्दरवरौ कृष्णात्मजौ देशिकौ॥ 10

मधुरिपुमहिलायाः स्फितवीक्षासरोजात्
मधुरफणितिभृङ्गी निर्गता कासिदेषा।
भुवनगुरु पदाब्ज ध्वन्द्व निर्यन्मरन्डान्
अनुदिनमनुभूयाऽनन्द सान्द्रा ममास्तु॥ 11

मणिप्रवाळाञ्चित सूक्तिसूनैः
विभूषिताशेष सहस्रशाखं।
अकल्पयत् कञ्चन कल्पवृक्षं
कृष्णः क्षितौ लोकगुरूत्तमाख्यं॥ 12

देवीशु पद्मनिलया दयिता बबूव
भक्तेशु सोऽपि वगुळङ्क मुनिर्वरेण्य।
आर्येशु निर्मल गुणस्त्वयमन्तरङ्गः
रङ्गातिपस्य नृपते जगतार्यनामा॥ 13

हृदयमुकुर बिम्बं यत् त्वहङ्कारपङ्क
स्थगित विमलरूपं स्वोक्तिशुद्धाम्बुपूरैः।
भुवनगुरुवर स्तच्चोधयित्वा जनानां
चिदचिदधिपतीं त्रीन् दर्शयन् भाति तत्र॥ 14

जनिजलधिपरीतागार लीनाऽत्मपङ्क्त्यै
त्रिविधविषय तृश्णाराक्षसीपीडितायै।
भुवनगुरुवरोऽदात् श्रीमतीं सूक्तिभूषां
पवनज इव देव्यै पाणिभूषां स्वभर्तुः॥ 15

फणितिकिरणजालैर्मानयन् मानसाब्जं
चरनमुषित दोषाऽरूडगाडान्धकारः।
अपर इव वपुष्मानम्शुमाली जनानां
पदमिव भुवनार्यो भासयन् भाति विष्णोः॥ 16

अन्तर्विलोचनमनन्ततमोनिगूढं
आलोख्य जन्तु निवहस्य दयार्द्रचेताः।
उन्मीलयन्नुपहितेन रहस्यत्रयार्थ
दीपेन यो जयति लोकगुरुं तमीडे॥ 17

बुवनगुरूत्तम चतुररन्ग पुराऽपणिकः
कलिरिपु दासवर्य कलितामल सूक्तिमणीन्।
गुणपणसन्ग्रहेण निपुणाय ददातिहितान्
अत पुनरेव वृत्तिमुपयान्ति विचित्रमिदं॥ 18

दृडमभवदविद्यावल्लरी वासनाऽद्भिः
समयविहितपोषा विस्तृता कर्मवृक्षे।
भुवनगुरुवरोक्तिप्रौडजञ्झामरुद्भिः
सतरुरफृता सा क्षेत्रिणो भग्नमूला॥ 19

यतिप्रवर भारतीजलनिधिं प्रपीयामलं
जगत्गुरुवलाहकः पटु ववर्ष भूमौ जलं।
विकासमगमत् परं विनतसस्य पङ्क्तिस्तदा
प्रवाहबहुलाऽभवत् निगममौलिविद्यानदी॥ 20

पटुप्रथमदेशिकैर्विरचिताः प्रबन्धाः परे
रहस्यत्रयपदावलीविवरणे प्रत्ताः परं।

श्रीमते रामानुजाय नमः

जगद्गुरुमुखोदिताः जगति भान्त्यमी भास्कराः

भवप्रभवसर्वरी विभव मोचनाहस्कराः॥ 21

अगम्यमहिमा जनैर्निगममौलिकान्तारभू

विहाररसिको वृक्षक्षितिभृतो वसन् कन्दरे।

विभाति विमतोन्मदद्विरदकुम्भसम्भेदन

क्षमोक्तिनखरो महान् स जगदार्यकण्टीरवः॥ 22

विगतविषयतृश्णः कृष्णपादाश्रयात्मा

द्रमिडनिगमदर्शी देशिकानाम् प्रधानः।

मधुरकविवचोभिः माननीयो ममासौ

शटरिपुरिव लोकाचार्यवर्यो विभाति॥ 23

चुलुकितभवसिन्धुं चित्तजक्रोधदैत्य

प्रमथनपटुबुद्धिं श्रीजगत्देसिकेन्द्रं।

दिरविडफणितिदक्षं दक्षिणाशानिषण्णं

कलशतनयमन्यं मन्यते मे मनस्त्वां॥ 24

श्रीवत्सरूपरुचिरोऽप्यरतिः प्रिया ते

प्रीतिमधुद्विषि भवप्रभवा न भीतिः।

लोकावलीविमललोचनगोचराङ्गः

कृष्णात्मजस्त्वमपरः किमु मन्मथोऽसि॥ 25

दृष्ट्वा ते भुवनार्य सुन्दरवपुः केचित् भवाम्भोनिधिं

सन्तीर्णाः श्रवणामृतं तव गुणं श्रुत्वा सकृत् केचन।

अन्ये केऽपि सुधासहोदरगिरः पीत्वाऽभवन्निर्मलाः

तस्मात् संसृतिवर्तनी क्शितितलेक्शीणा बभूव क्शणात्॥ 26

श्रीमते रामानुजाय नमः

तव चरणसरोजस्पर्शधन्यस्तु कश्चित्
फणिपतिपुर बाह्योद्यान सीमानिवासी।
भुवनगुरुवर श्रीपद्मनाभस्य पादे
विलयमगमदारान्मानवैर्दृश्यमानः॥ 27

सञ्जीवनी चरणरेणुकणावली ते
संसारतक्षक मुखक्षत मुग्धजन्तोः।
लोकार्यवर्य करुणामृत सारणी तु
संविल्लतां कलयते हृदये प्ररूढां॥ 28

शिष्येषु वाग्भूषणभूषितेषु
जगद्गुरो ते करुणाऽभिषेकात्।
स कूरवम्शोत्तम दासनामा
मान्यो गुरुणामभवन्महिम्ना॥ 29

रूपं पुराणमणिभिः श्रुतिवज्रदीप्तं
पद्मापतेर्मुनिजनस्तदलञ्चकार।
तत्र त्वया विरचितं तु मणिप्रवाल
वाग्भूषणं हि नितरां भुवनार्य भाति॥ 30

कामं भवन्तु गुरवो विविधागमार्थ
विज्ञानविश्वविदिताः विहितप्रबन्धाः।
त्वत्सूक्तिमौक्तिकगणो यदलञ्चकार
रङ्गाधिपश्रुतियुगं भुवनार्य किम् तैः॥ 31

श्रुतिनिकरगभीर काननान्तर्
विहरण विश्रुत बुद्धिना त्वयैव।

प्रपदनसरणिर्विशोधिताऽभूत्
भुवनगुरो भुवि लोकसाधनीया॥ 32

त्वयि विलसति रङ्गे शेषतल्पेन पुम्सा
जगति गुरुवर श्रीदृष्टिपूराभिषिक्ते।
कथमिव भुवनार्य त्वां विनाऽन्यं भजन्ते
सति दिनकरबिम्बे के प्रदीपं वहन्ति॥ 33

अवनसवनकर्मण्यात्मलोकस्य रङ्गी
भुवनगुरुवर त्वां कल्पयित्वा समर्थं।
तदनु भुजगराजोत्तुङ्ग पर्यङ्कशायी
रचयति सुखनिद्रां रघवाणां कुलेन्द्रः॥ 34

परपदनिलयोऽसौ पद्मया रङ्गनाथः
पुलिनतटमवाप्य त्वां भुवम्चापयित्वा।
चिरमभिलक्शितार्थं प्राप्य लोकार्य मन्ये
कलयति दरहासं फुल्लवक्त्रारविन्दः॥ 35

बहुविधदुरितौघे मज्जतां मानवानां
द्वयमनुकरयुग्मं सम्प्रसार्याञ्जसा तान्।
तटभुवमुपनीय प्रापिताशेषविद्यान्
कलयसिभुवनार्य त्वं कृपाचोदितात्मा॥ 36

वक्त्रेन्दोर्भुवनार्यवर्य भवतो वाणी सुधाधोदोरणी
जज्ञेऽष्टादशभेदपूर विहितत्राणात्मसस्या यतः।
एषा सम्सृतिभूरभूत् फलवती तस्मान्नदीमातृका
कृष्णाम्भोदविलोकिनी किल पुरा न प्राप वृद्धिं परां॥ 37

क्रोधः क्वापि पयोनिधौ निपतितः कामस्त्वनङ्गोऽभवत्
दर्पः सर्प इव द्रुतं वनबिले मग्नो न दृग्गो चरः।
दम्भाहङ्कृतिलोभमत्सरभटाः कुत्रापि कोणे गताः
जाते भूमितले विवेकमहिते लोकार्यवर्य त्वयि॥ 38

दया मुदमुपागमत् दमशमक्षमा भूषिताः
विरक्तिरपिशोभते विमलविद्ययाऽलङ्कृता।
मुहुस्सुमतिसम्स्कृता लसति विष्णुभक्तिर्गुणाः
विवेकजनकं जगद्गुरुमुपाश्रिता भान्त्यमी॥ 39

जगद्गुरुवरानिशं चरणसम्भृता भूसुराः
मुमुक्षुजनशेकरास्त्विति न चित्रमत्रावनौ॥
विविच्य चिदचित्प्रभूम्स्तव कृपाञ्जनोध्यद्दशा
निवृत्तिपथगामिनी सपदि भामिनी काऽप्यभूत्॥ 40

चतुर्वदनसुन्दरी तव मुखारविन्दं श्रिता
रमापतिपदप्रिया लसति काऽपि भक्तिर्हृदि।
विरक्तिरपि शोभते विदितनीलकण्ठाङ्गगा
वधूविमुखम् आः कथं भुवनदेशिकत्वां जगुः॥ 41

जगद्गुरुवर क्षितौ क्षपितकल्मषौघां कलां
चतुर्थपुरुषार्थदामपि कलौ वितत्य त्वयि।
कृतवतरणे पुनः कृतयुगक्रमः शोभते
न कोZपि भुवि दृष्यते नरकवर्तमगामी नरः॥ 42

हृदन्तरतमः प्रभामनुभवन्ति भक्तिं परे
प्रपत्तिमपि केचन प्रबलकर्मनिर्मूलिनीं।

श्रीमते रामानुजाय नमः

जगद्गुरुवर द्वयं भवतु सिद्धिदं साधनं
वयं तव पदाम्बुज स्मरणमेव मन्यामहे॥ 43

गुरुर्भवति देहिनां भुवन्देशिकस्यादरात्
अपाङ्गलवविप्रुषः परिपतन्ति यस्याङ्गके।
शुभानि किल तं भजन्त्यथ कला समुज्जृम्भते
भवन्ति नवसम्पदो भजति मोक्षलक्ष्मीः स्वयं॥ 44

श्रणोमि यदि वैदिकान् मखविधीन् जगद्देशिक
प्रकृष्टजनसेवितान् अहह मे मनः कम्पते।
अहेतुकदयारसैरवति दीनजीवान् मुदा
रमापतिरिति त्वया रचितसूक्तिभिर्मोदते॥ 45

आचक्रवालमवनौ भुवनार्य सर्वे
शम्सन्ति मङ्गळगुणान् विबुधप्रियाम्सते।
तेषु त्वदीय करुणां प्रगुणां तु मन्ये
रक्शां यया कलयसे भवभीतजन्तोः॥ 46

सुकृतलवविहीनं शुद्धभावैर्विमुक्तं
दुरितशतनिकेतं दूरयातं दयायाः।
पुनरपि जनमेनं वीक्शसे रक्शितुं त्वं
भुवनगुरुरसीत्थं कोऽपि वात्सल्यसिन्धुः॥ 47

विमतकुमतिपीडा मानसे सम्प्ररूडा
दृडममुमिह जीवं कृन्तति क्रूरवृत्तया।
अमृतरससखीभिस्तां निवार्याशु दृग्भिः
विरचय विधिशक्तं श्रीजगद्देशिकेन्द्रः॥ 48

श्रीमते रामानुजाय नमः

दोषा येन कृता मुरारिकरुणासारापगारोधकाः

शैलेन्द्राः शतशो वसन्ति न गुणस्याणोरणुर्दृश्यते।

लोकाचार्य जनम् तमेनमलसम् रक्षेद्भवाम्श्चेत् ततः

पद्माकान्तदयादयो वरगुणास्तस्मिम्स्तु तेभ्यो नमः॥ 49

यस्यासीत् कुलदैवतं रघुवरेणाराधितः श्रीसखः

कावेरिसरिदन्तरीपनगरी वासस्थली पुण्यभूः।

कृष्णो मान्यगुरुर्वरेण्यमहिमा वेदान्तविद्यानिधिः

भ्राता सौम्यवरः स्वयम्च भुवनाचार्योऽसि कस्ते समः॥ 50

कावेरीयुगलाम्बुपूर ललिते पुण्यन्तरीपेऽस्म्यहं

लोकार्यो व्रज तद्विजेति वरदः प्रोवाच भक्ताय हि।

इत्येवं गुरुसूक्तिभिर्गुरुवर त्वां मन्यमानस्त्वहं

वन्दे वारणशैलश्रृङ्गनिलयं मद्दैवतं श्रीसखं॥ 51

वेदान्तोक्तिविशोधितेषु च यतः कर्माद्युपायेषु मे

शक्तिर्न प्रगुणा निषिद्धकरणैर्मुह्यन्ति वागादयः।

श्रीवाणीरसजीवनं शमधनं रामानुजं मद्गुरुं

योगीन्द्रं भुवनार्य वीक्षय विमलैर्मां पालयालोकनैः॥ 52

प्रणम्य चरणौ तव प्रणतदेहिनां कामदौ

इदं किमपि वाञ्चितं भुवनदेशिक प्रार्थये।

असारफणितिक्षमाचरणमद्य हित्वा मनः

प्रयातु पदवीं शुभां वचनभूषणालङ्कृतां॥ 53

इत्थं जगद्गुरुवरप्रवणेन सर्व

तन्त्रस्वतन्त्र कवितार्किकसिंहनाम्ना।

श्रीमते रामानुजाय नमः

श्रीवेङ्कटेशकविना कलितां स्तुतिं ये

स्निग्धाः पठन्ति भुवि यान्ति परां श्रियं ते॥ 54

कवितार्किकसिम्हाय कल्याणगुणशालिने।

श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥